# 14. आदर्शप्रश्नपत्रम्

**समयः होरात्रयम्**

**सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः**

- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
- प्रत्येकं खण्डम् अधिकृत्य एकस्मिन् स्थाने क्रमेण उत्तराणि लेखनीयानि।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नपत्रानुसारं प्रश्नसंख्या अवश्यमेव लेखनीया।

**खण्ड – 'क'**

(अपठितः अनुच्छेदः – 10 अङ्काः)

**प्रश्न 1. अधोलिखितम् अनुच्छेदं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत्-**

बाल्यावस्था जीवनस्य महत्वपूर्णः कालः भवति। अस्मिन् समये यदि वयं परिश्रमं कुर्मः तदा जीवन सुखमयं भवति। विद्यार्थी बाल्यकाले विद्याध्ययने प्रवृत्तः भवति चेत् तस्य परीक्षाफलं शोभनं भवति, विषयस्यापि ज्ञानं सरलतया भवति। सः स्वस्वप्नं पूरयितुं समर्थो भवति। एवमेव चरित्रनिर्माणे चापि बाल्यकालः महत्वपूर्णं स्थानम् आदधाति। बाल्यकाले यादृशाः संस्काराः लभ्यन्ते तादृशः एव आचारः व्यवहारः च आजीवनम् अस्माभिः सह तिष्ठतः। अत एव अस्माभिः बाल्यकाले अवधानपूर्वकं गुणाधानस्य प्रयासः कर्त्तव्यः। अस्मिन् समये अध्ययनप्राप्तये अपि सावधानमनसा प्रयत्नः करणीयः। शरीरस्वास्थ्यरक्षायै चापि बाल्यकालादेव पौष्टिकाहारः ग्रहीतव्यः व्यायामः चापि करणीयः।

**(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव) (1 × 2 = 2)**
(क) बाल्यकाले अवधानपूर्वकं कस्य प्रयासः कर्त्तव्यः?
(ख) किमर्थं पौष्टिकाहारः ग्रहीतव्यः?

**उत्तरम्:**
(क) गुणाधानस्य
(ख) शरीरस्वास्थ्यरक्षायै

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयमेव) (2 × 2 = 4)**
(क) जीवनं कदा सुखमयं भवति?
(ख) कौ अस्माभिः सह सदैव तिष्ठतः?

**उत्तरम्:**
(क) यदा बाल्यकाले वयं परिश्रमं कुर्मः तदा जीवनं सुखमयं भवति।
(ख) आचाराः व्यवहारः च अस्माभिः सह सदैव तिष्ठतः।

**(iii) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयमेव) (1 × 3 = 3)**

**(क) 'अनवधानमनसा' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।**
(i) ध्यानमनसा
(ii) सावधानमनसा
(ii) मनसा
(iv) सावधानेन

**उत्तरम्:**
(ii) सावधानमनसा

**(ख) 'महत्त्वपूर्णः कालः' इत्यनयोः किं विशेषणपदम्?**
(i) पूर्णः
(ii) महत्त्वम्
(iii) कालः
(iv) महत्त्वपूर्णः

**उत्तरम्:**
(iv) महत्त्वपूर्णः

**(ग) 'बाल्यावस्था जीवनस्य महत्त्वपूर्णः कालः भवति' इति वाक्ये किं क्रियापदम्?**
(i) कालः
(ii) भवति
(iii) जीवनस्य
(iv) बाल्यावस्था

**उत्तरम्:**
(ii) भवति

Get More Learning Materials Here : CLICK HERE www.studentbro.in

## खण्ड – 'ख'

(रचनात्मक कार्यम् – 15 अङ्काः)

**प्रश्न 2. भवान् (अनिमेषः) शैक्षिकयात्रार्थं शिक्षकैः सह अरुणाचलप्रदेशं गन्तुमिच्छति। तदर्थम् अनुमति प्राप्तये यात्राव्ययार्थं च रूप्यकाणि लब्धं पितरं प्रति लिखितं पत्रमिदं मञ्जूषाप्रदत्तपदानां सहायतया पूरयत- (½ × 10 = 5)**

मञ्जूषा – अनुमतिः, मातृचरणयोः, रूप्यकाणि, यात्राव्ययार्थम्, व्यस्तः, शैक्षिकयात्रार्थम्, छात्राः, कुशली, यथाशीघ्रम्, भवतः

छात्रावासतः
दिनाङ्कः ______

पूज्य पितृचरणाः
प्रणतयः।
अत्र अहं सकुशलः स्वाध्ययने (i) ______ अस्मि। आशासे भवान् अपि (ii) ______ अस्ति। मम विद्यालयात् दशमकक्षायाः अनेके (iii) ______ शिक्षकै सह (iv) ______ अरुणाचल-प्रदेश गन्तुम् इच्छन्ति। यदि भवतः (v) ______ यात्, अहमपि तैः सह गन्तुकामोऽस्मि। (vi) ______ सहस्ररूप्यकाणि अपि आवश्यकानि। (vii) ______ स्वमन्तव्यं सूचयतु। यदि (viii) ______ सम्मतिः अस्ति (ix) ______ अपि प्रेषयतु। (x) ______ मम प्रणतिः निवेदनीया।

भवतः पुत्रः
अनिमेषः

**उत्तरम्:**

(i) व्यस्तः
(ii) कुशली
(iii) छात्राः
(iv) शैक्षिकयात्रार्थम्
(v) अनुमतिः
(vi) यात्राव्ययार्थम्
(vii) यथाशीघ्रम्
(viii) भवतः
(ix) रूप्यकाणि
(x) मातृचरणयोः।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**प्रश्न 3. अधः प्रदत्तं चित्रं दृष्ट्वा तदाधारितानि पञ्चवाक्यानि लिखत- (5)**



अथवा

'वर्धमानं प्रदूषणम्' इति विषयमधिकृत्य मञ्जूषातः पदानि चित्वा पञ्चवाक्यात्मकम् अनुच्छेदं लिखत।

मञ्जूषा – वैश्विक-उष्णता, यानानां व्यवहारः, विषाक्तवायुः, अवकरक्षेपणम्, जलप्रदूषणम्, वायुप्रदूषणम्, ध्वनिप्रदूषणम्, कोलाहलः, शुचिपर्यावरणम्, मलिनम्, यन्त्रागारम्

**उत्तरम्:**
1. इदं चित्रं विजयदशमी पर्वणः अस्ति।
2. चित्रे श्रीरामः रावणं बाणेन हन्ति)
3. रावणः पापस्य प्रतीकः अस्ति।
4. सः रामस्य भार्या सीताम् अहरत्।
5. श्रीरामः तं हत्वा सीताम् अमोचयत्।

अथवा
1. वर्धमानं प्रदूषणं मानवजीवनस्य नाशकः अस्ति।
2. अनेन वैश्विक उष्णता विषाक्त वायुः प्रदूषणं च वर्धन्ते।
3. प्रदूषणं तु जलप्रदूषणं, वायु प्रदूषणं ध्वनिप्रदूषणं इति त्रिधा भवति।
4. नगराणां कोलाहलः विषाक्त वायुः चापि प्रदूषणं वर्धयतः।
5. अतः प्रदूषणस्य निवारणाय यन्त्रागारं दूरं निर्माय शुचिपर्यावरणं कर्तव्यम्।

**प्रश्न 4. अधोलिखित-वाक्यानां संस्कृतेन अनुवादं कुरुत (केवलं पञ्च एव)**
(i) छात्र विद्यालय जाता है। A student goes to school.
(ii) मैं परिश्रम करता हूँ। I work hard.
(iii) तुम क्या करते हो? What do you do?
(iv) पिता के साथ पुत्र घूमता है। Son walk with his father.

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(v) शिक्षक पाठ पढ़ाते हैं। Teacher teaches the lesson.

**उत्तरम्:**
(i) छात्रः विद्यालयं गच्छति।
(ii) अहम् परिश्रमं करोमि।
(iii) त्वम् किं करोषि।
(iv) पित्रा सह पुत्रः भ्रमति।
(v) शिक्षकाः पाठं पाठयति।

**खण्ड – 'ग'**
(अनुप्रयुक्त-व्याकरणम् – 25 अङ्काः)

**प्रश्न 5. अधोलिखित-वाक्येषु रोखाङ्कितपदानां सन्धि विच्छेदं वा कुरुत (केवलं चत्वारि एव) (1 × 4 = 4)**

(i) पिताऽस्य किं तपस्तेपे इत्युक्तिः तत् कृतज्ञता।
(ii) सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
(iii) विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
(iv) स एवं वह्निः + दहते शरीरम्।

**उत्तरम्:**
(i) तपः + तेपे
(ii) फल + छायासमन्वितः
(iii) किञ्चित् + निरर्थकम्
(iv) वह्निर्दहते

**प्रश्न 6. अधोलिखित-वाक्येषु रेखाङ्कितपदानां समस्तपदं लिखत (केवलं चत्वारि एव) (1 × 4 = 4)**

**(i) यदि अहं कृष्णः वर्णः यस्य सः तर्हि श्रीरामस्य वर्णः कीदृशः?**
(क) कृष्णवर्णा
(ख) कृष्णवर्णम्
(ग) कृष्णवर्णः
(घ) कृष्णवर्णाः

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**उत्तरम्:**
(ग) कृष्णवर्णः

**(ii) सर्वेषां महत्त्वं विद्यते समयम् अनतिक्रम्य।**
(क) यथासमयम्
(ख) यथासमयः
(ग) यथासमय
(घ) यथासमयाय

**उत्तरम्:**
(क) यथासमयम्

**(iii) मिलित्वा प्रकृतेः सौन्दर्यम् रक्षणीयम्।**
(क) प्रकृति सौन्दर्य
(ख) प्रकृतिसौन्दर्यः
(ग) प्राकृति सौन्दर्यः
(घ) प्रकृतिसौन्दर्यम्

**उत्तरम्:**
(घ) प्रकृतिसौन्दर्यम्

**(iv) माता च पिता च वन्दनीयौ।**
(क) मातापितौ
(ख) पितरौ / मातापितरौ
(ग) पितौ
(घ) मातरौ

**उत्तरम्:**
(ख) पितरौ / मातापितरौ

**प्रश्न 7. अधोलिखित-वाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा रिक्तस्थानानि पूरयत (केवलं चत्वारि मव) (1 × 4 = 4)**

**(i) श्रमक्लमपिपासोष्णशीतादीनां सहिष्णु + तल् ______ ।**
(क) सहिष्णुतल्
(ख) सहिष्णुता

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ग) सहिष्णुताम्
(घ) सहिष्णुतया

**उत्तरम्:**
(ख) सहिष्णुता

**(ii) वैज्ञानिकाः __________ कथयन्ति यत् पाषाणशिलानां संघर्षणेन कम्पनं जायते।**
(क) वैज्ञान + ठक्
(ख) विज्ञान + ठक्
(ग) विज्ञान + इक
(घ) विज्ञानी + अक्

**उत्तरम्:**
(ख) विज्ञान + ठक्

**(iii) बुद्धि + मतुप __________ सर्वत्र पूज्यते।**
(क) बुद्धिमत्
(ख) बुद्धिमन्
(ग) बुद्धिवान्
(घ) बुद्धिमान्

**उत्तरम्:**
(घ) बुद्धिमान्

**(iv) राजसिहंस्य पत्नी बुद्धिमती __________ आसीत्।**
(क) बुद्धिमत् + डीप्
(ख) बुद्धि + मती
(ग) बुद्धि + मतुप्
(घ) बुद्धि + मतु

**उत्तरम्:**
(क) बुद्धिमत् + ङीप्

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**प्रश्न 8. प्रदत्तेभ्यः विकल्पेभ्यः समुचितं। विकल्पं चित्वा वाच्यानुसारं रिक्तस्थानानि पूरयत (केवलं त्रीणि एव) (1 × 3 = 3)**

(i) ______ सत्यं कथ्यते। (त्वम् / त्वाम् / त्वया)
(ii) काकः पिकस्य ______ पालयति। (सन्ततिः / सन्ततिम् / सन्तत्या)
(iii) पित्रा पुत्राय विद्याधनं ______। (ददाति / दीयते / यच्छति)

**उत्तरम्:**
(i) त्वया
(ii) सन्ततिम्
(iii) दीयते

**प्रश्न 9. कोष्ठके प्रदत्त-समयवाचकान् अङ्कान् संस्कृतेन लिखत (केवलं चत्वारि एव) (1 × 4 = 4)**

(i) बालकः ______ वादने उत्तिष्ठति। (6:00)
(ii) सः ______ वादने विद्यालयं गच्छति। (7:15)
(iii) ______ वादने विद्यालये अर्धावकाशः भवति। (11:30)
(iv) सः ______ वादने विद्यालयात् गृहम् गच्छति। (1:45)

**उत्तरम्:**
(i) षड्
(ii) सपादसप्त
(iii) सार्ध-एकादश
(iv) पादोन द्वि

**प्रश्न 10. मञ्जूषाप्रदत्त-अव्ययपदैः रिक्तस्थानानि पूरयत- (½ × 6 = 3)**

मञ्जूषा – यत्र, अद्य, सदा, यदि, तत्र, तर्हि

(i) __________ परिश्रमं कुर्मः __________ सफलाः भवामः।
(ii) __________ समयस्य सदुपयोगः करणीयः।
(iii) जीवनम् __________ दुर्वहं जातमस्ति ।
(iv) __________ हरीतिमा __________ पर्यावरणं शुद्धम्।

**उत्तरम्:**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(i) यदि, तर्हि
(ii) सदा
(iii) अद्य
(iv) यत्र, तत्र

**प्रश्न 11. रेखाङ्कितपदं संशोध्य वाक्यानि लिखत (केवलं त्रीणि एव) (1 × 3 = 3)**

**(i) ते नार्यः गल्पं कुर्वन्ति।**
(क) सा
(ख) तौ
(ग) ताः
(घ) सः

**उत्तरम्:**
ताः नार्यः गल्पं कुर्वन्ति।

**(ii) अहं परिश्रमं करोति।**
(क) सः
(ख) तौ
(ग) ते
(घ) त्वम्

**उत्तरम्:**
सः परिश्रमं करोति।

**(iii) बालकः कार्यं कुर्वन्ति।**
(क) बालकौ
(ख) बालकाः
(ग) बालिके
(घ) बालिका

**उत्तरम्:**
बालकाः कार्यं कुर्वन्ति।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

## खण्ड – 'घ'

(पठित-अवबोधनम् – 30 अङ्काः)

**प्रश्न 12. अधोलिखितं गद्यांशं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत-**

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः, पुत्रं च द्रष्टुं प्रस्थितः। परमर्थकार्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्।

**(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव) (½ × 2 = 2)**

(क) निर्धनो जनः भूरि परिश्रम्य किम् उपार्जितवान्?
(ख) अर्थकार्येन पीडितः सः केन प्राचलत्?

**उत्तरम्:**
(क) वित्तम्
(ख) पदातिः

**(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नएकमेव) (1 × 1 = 1)**
(क) निर्धनः जनः वित्तेन किं कृतवान्?

**उत्तरम्:**
(क) निर्धनः जनः वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलः भूतवान्।

**(iii) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयमेव) (1 × 3 = 3)**
(क) 'धनम्' इत्यस्य समानार्थकपदं गद्यांशात् चित्वा लिखत।
(ख) 'निर्धनः जनः' इत्यनयोः किं विशेषणपदम्?
(ग) 'परमर्थकार्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्' इति वाक्ये 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**उत्तरम्:**
(क) वित्तम्
(ख) निर्धनः
(ग) निर्धनजनाय / निर्धनपित्रे

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**प्रश्न 13. अधोलिखितं पद्यांशं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत-**

उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति बोधिताः।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः।।

**(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव) (½ × 2 = 1)**
(क) केन उदीरितः अर्थः गृह्यते?
(ख) काः परेङ्गितज्ञानफलाः भवन्ति?

**उत्तरम्:**
(क) पशुना
(ख) बुद्धयः

**(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नएकमेव) (1 × 1 = 1)**
(क) पण्डितः जनः किम् ऊहति?

**उत्तरम्:**
(क) पडितः जनः अनुक्तम् अपि ऊहति।

**(iii) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयमेव) (1 × 3 = 3)**
(क) 'अश्वाः ' इति अर्थे पद्ये किं पदं प्रयुक्तम्?
(ख) 'मूर्खः' इत्यस्य विलोमपदं श्लोकात् चित्वा लिखत।
(ग) 'हयाश्च नागाश्च वहन्ति बोधिताः' इति वाक्ये किं क्रियापदम्?

**उत्तरम्:**
(क) हयाः
(ख) पण्डितः
(ग) वहन्ति

**प्रश्न 14. अधोलिखितं नाट्यांशं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत-**

चाणक्यः – भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।
चन्दनदासः – आज्ञापयतु आर्यः, किं कियत् च अस्मज्जनादिष्यते इति।
चाणक्यः – भो श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।
चन्दनदासः – (सहर्षम्) आर्य! अनुगृहीतोऽस्मि।
चाणक्यः – भो श्रेष्ठिन्! स चापरिक्लेशः कथमाविर्भवति इति ननु भवता प्रष्टव्याः स्मः।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव) (½ × 2 = 1)**
(क) प्रीताभ्यः प्रकृतिभ्यः राजानः किम् इच्छन्ति?
(ख) कस्य अर्थसम्बन्धः प्रीतिमुत्पादयति?

**उत्तरम्:**
(क) प्रतिप्रियम्
(ख) नन्दस्य

**(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नएकमेव) (1 × 1 = 1)**
(क) चन्दनदासेन (भवता) किं प्रष्टव्यम्?

**उत्तरम्:**
(क) चन्दनदासेन चाणक्यस्य आदेशः प्रष्टव्यः।

**(iii) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयमेव) (1 × 3 = 3)**
(क) 'दुःखाभावः' इति अर्थे नाट्यांशे किं पदं प्रयुक्तम्?
(ख) 'आर्य अनुगृहीतोऽस्मि' अत्र 'अस्मि' इति क्रियापदस्य कर्तृपदम् किम्?
(ग) 'किं कियत् च अस्मज्जनादिष्यते' इति वाक्ये किं क्रियापदम्?

**उत्तरम्:**
(क) अपरिक्लेशः
(ख) अहम्
(ग) आदिष्यते

**प्रश्न 15. अधोलिखितवाक्येषु रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत (केवलं प्रश्नचतुर्णामेव) (1 × 4 = 4)**

**(i) <u>विद्वांस</u> एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**
(क) के
(ख) कः
(ग) कथम्
(घ) काः

**उत्तरम्:**
(क) के

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ii) समीपे <u>एका नदी</u> प्रवहति।**
(क) कीदृशी
(ख) काः
(ग) का
(घ) कुत्र

**उत्तरम्:**
(ग) का

**(iii) <u>अतिदाक्षिण्येन</u> अलम्।**
(क) कथम्
(ख) केन
(ग) कः
(घ) कया

**उत्तरम्:**
(ख) केन

**(iv) <u>गहनकानने</u> सा व्याघ्रं ददर्श।**
(क) के
(ख) कस्मिन्
(ग) कदा
(घ) कुत्र

**उत्तरम्:**
(घ) कुत्र

**प्रश्न 16. अधोलिखितयोः श्लोकयोः अन्वये रिक्तस्थानानि पूरयत- (½ × 8 = 4)**

**(i) त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
परित्यज्य फलं पक्कं भुङ्क्तेऽपक्कं विमूढधीः।।

अन्वयः – यः __________ वाचं त्यक्त्वा __________ अभ्युदीरयेत् (सः) __________ पक्कं फलं परित्यज्य अपक्कं __________।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ii) अपत्येषु च सर्वेषु जननी तुल्यवत्सला।**
पुत्रे दीने तु सा माता कृपार्द्रहृदया भवेत्।।

अन्वयः – सर्वेषु च __________ जननी __________ भवति। परं माता दीने __________ तु __________ भवेत्।

**अथवा**

**अधोलिखितस्य श्लोकस्य भावार्थे रिक्तस्थानपूर्तिं मञ्जूषाप्रदत्तपदानां सहायतया कुरुत- (1 × 4 = 4)**

यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म सः परेभ्यः कदापि च।।

भावार्थः – यः नरः आत्मनः __________ इच्छति, तस्य __________ अपि इच्छा अस्ति, सः __________ कृते कदापि अकल्याणकर __________ न कुर्यात् इति अवधातव्यम्।

मञ्जूषा – कार्यम् सुखप्राप्तेः कल्याणम्, अन्येषाम्

**उत्तरम्:**
(i) धर्मप्रदां, परुषाम्, विमूढधीः, भुङ्क्ते।
(ii) अपत्येषु, तुल्यवत्सला, पुत्रे, कृपार्द्रहृदया
अथवा
कल्याणम्, सुखप्राप्तेः, अन्येषाम्, कार्यम्

**प्रश्न 17. अधोलिखितवाक्यानि घटनाक्रमानुसारं लिखत- (½ × 8 = 4)**

(i) बुद्धिमती व्याघ्रभयात् मुक्ता जाता।
(ii) ग्रामे राजसिंहः नाम राजपुत्रः वसति स्म।
(iii) गलबद्धश्रृगालकः व्याघ्रः सहसा पलायितः।
(iv) व्याघ्रः श्रृगालं निजगले बद्ध्वा काननं गतवान्।
(v) तस्य भार्या पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
(vi) जम्बुकः व्याघ्र पुनः तत्र गन्तुं प्रेरितवान्।
(vii) इयं व्याघ्रमारी इति विचिन्त्य भयेन व्याघ्रः पलायितः।
(viii) सा पुत्रौ उक्तवती-एकं व्याघ्रं विभज्य खादतम्।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**उत्तरम्:**
(i) ग्रामे राजसिंहः नाम राजपुत्रः वसति स्म।
(ii) तस्य भार्या पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
(iii) सा पुत्रौ उक्तवती-एकं व्याघ्रं विभज्य खादतम्।
(iv) इयं व्याघ्रमारी इति विचिन्त्य भयेन व्याघ्रः पलायितः।
(v) जम्बुकः व्याघ्रं पुनः तत्र गन्तुं प्रेरितवान्।
(vi) व्याघ्रः शृगालं निजगले बद्ध्वा काननं गतवान्।
(vii) गलबद्धश्रृगालकः व्याघ्रः सहसा पलायितः।
(viii) बुद्धिमती व्याघ्रभयात् मुक्ता जाता।

**प्रश्न 18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत (केवलं प्रश्नत्रयमेव) (1 × 3 = 3)**

(i) अत्र जीवनं दुर्वहं जातम्।
सरलम् / कठिनम् / जटिलम्

(ii) संव्यवहाराणां वृद्धिलाभाः प्रचीयन्ते।
संस्काराणाम् / संलापानाम् / व्यापाराणाम्

(iii) तौयैः अल्पैः अपि तरोः पुष्टिः भवति।
जलैः / त्वग्भि / दुग्धैः।

**उत्तरम्:**
(i) कठिनम्
(ii) संस्काराणाम्
(iii) जलैः

Get More Learning Materials Here : CLICK HERE www.studentbro.in